# पाठ – 2

# बिलस्य वाणी न कदापि में श्रुता

---

**अभ्यास:**

**Q1. उच्चारणं कुरुत-**

| | | |
|---|---|---|
| कस्मिंश्चित् | विचिन्त्य | साध्विदम् |
| क्षुधार्त: | एतच्छ्रुत्वा | भयसन्त्रस्तमनसाम् |
| सिंहपदपद्धति: | समाह्वानम् | प्रतिध्वनि: |

**Answer.** विद्यार्थी इसका उच्चारण करें।

**Q2. एकपदेन उत्तरं लिखत-**

**(क) सिंहस्य नाम किम्?**

**(ख) गुहाया: स्वामी क: आसीत्?'**

**(ग) सिंह: कस्मिन् समये गुहाया: समीपे आगत:?**

**(घ) हस्तपादादिका: क्रिया: केषां न प्रवर्तन्ते?**

**(ङ) गुहा केन प्रतिध्वनिता?**

**Answer.** (क) खरनखर:।

(ख) दधिपुच्छ: शृगाल:।

(ग) सूर्यास्तसमये।

(घ) भयसन्त्रस्तमनसाम् ।

(ङ) सिंहस्य गर्जनेन ।

**Q3. पूर्णवाक्येन उत्तरत-**

**(क) खरनखर: कुत्र प्रतिवसति स्म?**

**(ख) महतीं गुहां दृष्ट्वा सिंहः किम् अचिन्तयत्?**

**(ग) शृगालः किम् अचिन्तयत्?**

**(घ) शृगालः कुत्र पलायितः?**

**(ङ) किं विचार्य सिंहः शृगालस्य आह्वानमकरोत्?**

**(च) अस्यां कथायां कस्य चातुर्यं निरूपितं सिंहस्य शृगालस्य वा?**

**Answer.** (क) खरनखरः वने प्रतिवसति स्म।

(ख) महतीं गुहां दृष्ट्वा सिंहः अचिन्तयत – "नूनम् एतस्यां गुहायां रात्रौ कोऽपि जीवः आगच्छति। अतः अत्रैव निगूढ़ो भूत्वा तिष्ठामि।"

(ग) शृगालः अचिन्तयत् – "अहो विनष्टोऽस्मि। नूनम् अस्मिन् बिले सिंहः अस्तीति तर्कयामि। तत् किं करवाणि?"

(घ) शृगालः गुहायाः दूरं पलायितः।

(ङ) सिंहः शृगालस्य आह्वानमकरोत् यतोहि – मम् आह्वान श्रुत्वा सः बिले प्रविश्य मे भोज्यं भविष्यति।

(च) अस्यां कथायां शृगालस्य चातुर्यं निरूपितं यतोहि स स्वयुक्तिया सिंहस्य चाले विफलं अकरोत।

**Q4. रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत**

**(क) क्षुधार्तः सिंहः कुत्रापि आहारं न प्राप्तवान्?**

**(ख) दधिपुच्छः नाम शृगालः गुहायाः स्वामी आसीत्?**

**(ग) एषा गुहा स्वामिनः सदा आह्वानं करोति?**

**(घ) भयसन्त्रस्तमनसां हस्तपादादिकाः क्रियाः न प्रवर्तन्ते?**

**(ङ) आह्वानेन शृगालः बिले प्रविश्य सिंहस्य भोज्यं भविष्यति?**

**Answer.** (क) कीदृशः सिंहः कुत्रापि आहारं न प्राप्तवान्?

(ख) किं नाम शृगालः गुहायाः स्वामी आसीत्?

(ग) एषा गुहा कस्य सदा आह्वानं करोति?
(घ) भयसन्त्रस्तमनसां कीदृशाः क्रियाः न प्रवर्तन्ते?

(ङ) आह्वानेन शृगालः कुत्र प्रविश्य सिंहस्य भोज्यं भविष्यति?

**Q5. घटनाक्रमानुसारं वाक्यानि लिखत-**

**(क) गुहाया: स्वामी दधिपुच्छ: नाम शृगाल: समागच्छत्।**

**(ख) सिंह: एकां महतीं गुहाम् अपश्यत्।**

**(ग) परिभ्रमन् सिंह: क्षुधार्तो जात:।**

**(घ) दूरस्थ: शृगाल: रवं कर्त्तुमारब्ध:।**

**(ङ) सिंह: शृगालस्य आह्वानमकरोत्।**

**(च) दूरं पलायमान: शृगाल: श्लोकमपठत्।**

**(छ) गुहायां कोऽपि अस्ति इति शृगालस्य विचार:।**

**Answer.** एतानि उपयुक्त क्रम निम्न सन्ति:-

(क) परिभ्रमन् सिंह: क्षुधार्तो जात:।

(ख) सिंह: एकां महतीं गुहाम् अपश्यत्।

(ग) गुहाया: स्वामी दधिपुच्छ: नाम शृगाल: समागच्छत्।

(घ) गुहायां कोऽपि अस्ति इति शृगालस्य विचार:।

(ङ) दूरस्थ: शृगाल: रवं कर्त्तुमारब्ध:।

(च) सिंह: शृगालस्य आह्वानमकरोत्।

(छ) दूरं पलायमान: शृगाल: श्लोकमपठत्।

**Q6. यथानिर्देशमुत्तरत**

**(क) 'एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्' अस्मिन् वाक्ये कति विशेषणपदानि, संख्यया सह पदानि अपि लिखत? ।**

**(ख) तदहम् अस्य आह्वानं करोमि- अत्र 'अहम्' इति पदं कस्मै प्रयुक्तम्?**

**(ग) 'यदि त्वं मां न आह्वयसि' अस्मिन् वाक्ये कर्तृपदं किम्?**

**(घ) 'सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते' अस्मिन् वाक्ये क्रियापदं किम्?**

**(ङ) 'वनेऽत्र संस्थस्य समागता जरा' अस्मिन् वाक्ये अव्ययपदं किम्?**

**Answer.** (क) 'एकां महतीं गुहां दृष्ट्वा सः अचिन्तयत्' – अस्मिन् वाक्ये द्वे विशेषणपदे स्तः। तद्यथा – १. एकाम् इति प्रथमं विशेषणपदम्, २. महतीम् इति च द्वितीयं विशेषणपदम्।

(ख) तदहम् अस्य आह्वानं करोमि – अत्र 'अहम्' इति पदं सिंहाय प्रयुक्तम्।

(ग) 'यदि त्वं मां न आह्वयसि' अस्मिन् वाक्ये 'त्वम्' इति कर्तृपदम्।

(घ) 'सिंहपदपद्धतिः गुहायां प्रविष्टा दृश्यते' – अस्मिन् वाक्ये 'दृश्यते' इति क्रियापदम्।

(ङ) 'वनेऽत्र संस्थस्य समागता जरा' अस्मिन् वाक्ये अव्ययपदं भवति 'अत्र' इति।

**Q7. मञ्जूषात: अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत- सहसा दूरे क्रमश: यदा तदा परन्तु यदि तर्हि एकस्मिन् वने कश्चन व्याध: जालं विस्तीर्य —————— स्थित:। —————— आकाशे सपरिवार: कपोतराज: चित्रग्रीव: निर्गत:। —————— तण्डुलकणानामुपरि कपोतानां लोभो जात:। —————— राजा तत्र सहमत: नासीत्। तस्य युक्ति: आसीत् —————— निर्जने वने कोऽपि मनुष्यो नास्ति —————— कुतो वा तण्डुलकणानां सम्भव:? —————— राज्ञ: उपदेशमस्वीकृत्य ते नीचै: आगता, —————— जाले निपतिता:। अत: उक्तम् '—————— विदधीत न क्रियाम्'।**

**Answer.** एकस्मिन् वने कश्चन व्याध: जालं विस्तीर्य दूरे स्थित:। क्रमश: आकाशे सपरिवार: कपोतराज: चित्रग्रीव: निर्गत:। तदा तण्डुलकणानामुपरि कपोतानां लोभो जात:। परन्तु राजा तत्र सहमत: नासीत्। तस्य युक्ति: आसीत् यदि निर्जने वने कोऽपि मनुष्यो नास्ति तर्हि कुतो वा तण्डुलकणानां सम्भव:? यदा राज्ञ: उपदेशमस्वीकृत्य ते नीचै: आगता, तदा जाले निपतिता:। अत: उक्तम् ' सहसा विदधीत न क्रियाम्'।